**अवधारणा {AWADHARANA}**
{A Peer-Reviewed Multidisciplinary, Open Access & NepJOL Indexed Journal}
Volume 9, 2025 {Print ISSN: 2505-080x}
Email: loktantrik066@gmail.com
URL: https://nepjol.info/index.php/awadharana
Copyrights: *Copyright 2025 Author/s and Creative Democrat Academy, Pokhara, Nepal. This work is licensed under a Creative Commons Attribution- Non Commercial* 4.0 International License
***Publisher***
*Creative Democrat Academy*

# न्यायवैशेषिकदर्शनाभिमतोऽभावपदार्थः

**केशवशरणोऽर्यालः {Keshav Sharan Aryal}**

न्यायविभागः, वाल्मीकिविद्यापीठम्, काष्ठमण्डपस्थम्
{Department of Ancient Logic, Valmeeki Vidhyapeeth, Kathmandu}

**Article History:**
Receved 16 August 2025; Reviewed: 11 September 2025; Accepted 26 October 2025
**Corresponding Author:**
Keshav Sharan Aryal **,** Email : keshavsharanaryal88@gmail.com
Orcid ID : https://orcid.org/0009-0003-1669-5580
DOI : https://doi.org/10.3126/awadharana.v9i1.86194

**सारः**

न्यायशास्त्रं तावत् प्रमाणशास्त्रम् । तत्र विशेषतः प्रमाणविश्लेषणं विधीयते । न्यायशास्त्रे स्वतोऽभावपदार्थ उद्दिष्टो विवेचितश्च नास्ति । अथापि नैकेषु न्यायसूत्रेष्वभावपदमागतम् । तेन च शास्त्रेऽस्मिनप्यभावपदार्थः स्वीकृत इति ज्ञायते । तत्र साक्षादभावपदार्थस्य भेदविषयकविश्लेषणस्यासत्त्वेऽपि नैकविधैरभावपदघटितैः न्यायसूत्रैः प्रागभावादयो द्योतिताः सन्ति । विशेषमधिकृत्य प्रवर्तितं दर्शनमेव वैशेषिकदर्शनम् । तत्र सूत्रकारेणोद्देशसूत्रे द्रव्यगुणकर्मसामान्यविशेषसमवायाः षट् पदार्था एव स्वेण निगदिताः । पृथक्पदार्थस्याभावस्यापि सत्त्वे तथा किमर्थमिति चेत् सत्यम्, परमभावस्य प्रतियोगिनिरूपणाधीननिरूपणीयत्वाद्रवेणोद्देशसूत्रे तन्नोक्तम्, न तु हेयत्वादिति रहस्यविदः । एतन्नामाभावपदार्थनिरूपणाय तत्प्रतियोगिभावपदार्थो निरूप्यो भवति । भावे निरूपिते सति तदभावनिरूपणं सहजम् । भूधातोर्घञि निष्पन्नो भावशब्दः कस्यचन वस्तुनः सत्त्वं द्योतयति । भावश्चासौ पदार्थो भावपदार्थः । तद्भिन्नोऽभावपदार्थः । एतन्नाम नञ्पदजन्यप्रतीतिविषयत्वमभावत्वमिति फलितार्थः । अस्तीतिजन्यप्रयत्यस्य सविषयकत्वमिव नास्तीतिजन्यप्रत्ययस्यापि सविषयकत्वं निराबाधम् । प्रत्ययमात्रस्य निर्विषयकत्वाभावात् । कस्मिँश्चित् कार्ये यथा भावस्य कारणत्वं निराबाधं तथैवाभावस्यापि कारणत्वमेव । अभावस्य कथं कारणत्वमिति चेत् कार्यप्रतिबन्धकाभावत्वे एव कार्योत्पत्तेरिति

ज्ञेयम् । प्राभाकरमीमांसका अभावस्याधिकरणस्वरूपत्वमुरीकृत्य पृथक्पदार्थत्वं न स्वीकुर्वन्ति । तत्र बीजत्वेन लाघवं पुरःस्थाप्यते । परं नैयायिका अनन्ताधिकरणत्वकल्पनापेक्षयाऽतिरिक्ताभावकल्पयनाया लाघवाद् भिन्नोऽभावपदार्थ इति प्रतिपादयन्ति । भाट्टास्तु अभावमपि न केवलं पृथक्पदार्थत्वेनाङ्गीकुर्वन्त्यपितु वैशेषिका इवादौ संसर्गान्योन्याभावभेदेन द्विधा विभजन्ते, संसर्गाभावञ्च पुनः प्रागभावादिभेदेन त्रिधेति । अभावश्च वैशेषिकचिन्तने प्रागभावप्रध्वंसाभावात्यन्ताभावान्योन्याभावभेदेन चतुर्धा विभज्यते । अनादिः सान्तः प्रागभावः, सादिरनन्तः प्रध्वंसाभावः, त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽभावोऽत्यन्ताभावः, पारस्परिकाभावोऽन्योन्याभाव इति । केचन पुनः ध्वंसाभावं प्रतियोगिविशेषमामन्वत इति तत्पक्षमुपस्थाप्य सूत्रकारतद्व्याख्यातृभिरभावस्य क्रियागुणव्यवहाराभावाद् वस्तुनश्च तथा व्यवहाराद् ध्वंसाभावो ह्यर्थान्तरमिति साधितं विद्यते । केचित्तु घटवति भूतलादौ उत्पादविनाशशाली किं वा उत्पत्तिप्रतियोगी, ध्वंसप्रतियोगी चेति चतुर्थोऽयं संसर्गाभावस्यावान्तरभेद इत्यप्याचक्षते ।

**शब्दकुञ्जी :** न्यायः, वैशेषिकम्, भावः, अभावः, प्रतियोगी ।

## विषयपरिचयः

न्यायशास्त्रन्तावत् प्रमाणैरर्थपरीक्षणमिति । शास्त्रेऽस्मिँश्च प्रमाणप्रमेयादीनां षोडशपदार्थानां विवेचनम् । तत्रापि विशेषतः शास्त्रस्यास्य कृत्यं प्रमाणविवेचनमिति हेतोश्शास्त्रस्यैतस्य प्रमाणशास्त्रपदेन व्यवहारः । काणादशास्त्रञ्च पुनर्विशेषपदार्थमधिकृत्य प्रवर्तमानत्वाद् वैशेषिकसंज्ञेत्यस्य । तत्र द्रव्यादीनां सप्तानां पदार्थानां विश्लेषणं विद्यते । न्यायदर्शनेनाभिहितानां प्रतिपादितानाञ्च पदार्थानां वैशेषिकदर्शने स्वीकृतेरथ च वैशेषिकशास्त्रेणाभिमतानां पदार्थानां न्यायशास्त्रे चोरीकृतत्वान्न्यायवैशेषिकयोः समानतन्त्रत्वन्निराबाधम् । अत्र च लेखे वैशेषिकशास्त्रे स्पष्टतो व्याख्यातस्य न्यायशास्त्रे च स्वीकृतस्याभावपदार्थस्य विश्लेषणं क्रियते । तत्राऽऽदौ पूर्वकार्यसमीक्षणादिकं वितन्यते ।

## पूर्वकार्यस्य समीक्षणम्

यद्यपि सामान्यतो न्यायवैशेषिकदर्शनदृष्ट्याभावपदार्थविषयकं समीक्षणं बहुधा बहुभिर्विद्वद्भिः कृतं लभ्यते, अथापि न्यायवैशेषिकदर्शनदृष्ट्याभावतत्त्वपरिशीलनक्रमे तद्विश्लेषणानिवार्यत्वसन्दर्शनपूर्वकं समीक्षणं वस्तुगत्या तत्तात्पर्यञ्च न परिशीलितं दृश्यते । तथापि अभावविषयकं चिन्तनं किञ्चन लभ्यत एव । तदेवादायात्र थालीपुलाकन्यायेन कालक्रमानुसारेण किञ्चन प्रस्तूयते–

आनन्दझामहोदयेन *पदार्थशास्त्र* (१९६५) इत्याख्ये ग्रन्थे न्यायवैशेषिकदर्शनसम्बद्धमभावपदार्थमादाय नैके विचाराः प्रस्तुताः सन्ति । तत्रभवता महाभागेन विशेषतो वैशेषिकीं दृष्टिमादाय अभावचिन्तने प्रस्तुतेऽपि न्यायदृष्ट्या मौनमेवाचरितमस्ति ।

नारायणमिश्रमहोदयेन *वैशेषिकदर्शन : एक अध्ययन* (१९६८) इत्याख्ये वैशेषिकदर्शनसम्बद्धे ग्रन्थे अभावोऽपि विश्लेषितो विद्यते । अथापि न्यायदृष्ट्या कथमभावो विचारणीयः ? इत्यत्र न किमप्युक्तमस्ति ।

दीपकघोषमहाभागेन *अभावविमर्शः* (१९८४) इत्याख्ये ग्रन्थेऽभावो विमृष्टो वर्तते । तत्र तावत् तेन अभावपदार्थमादाय सम्यग् विश्लेषणं कृतमस्ति ।

डा.वैकुण्ठघिमिरेमहाभागेन *वात्स्यायनप्रशस्तपादभाष्ययोस्तुलनात्मकमध्ययनम्* (वै.२०६७) इत्याख्ये विद्यावारिधिशोधप्रबन्धेऽभावपदार्थमादाय किञ्चन चिन्तनं विहितमस्ति । अथापि तत्र दर्शनद्वयमादाय तदभिमतस्याभावस्याऽऽन्तं विश्लेषणं विहितं नास्ति ।

एतावता तत्राऽनेकैर्विद्वद्भिः साक्षात् परम्परया वा न्यायवैशेषिकदर्शनाऽभिमताभावपदार्थसम्बद्धानि कानिचन चिन्तनानि व्यक्तीकृतानीति ज्ञायते । तथा सत्यप्युक्तानां चिन्तनानां सामान्यप्रसङ्गतया आरब्धत्वात्तत्र तत्रानुसन्धानदृशा नैयूनं निर्बलत्वञ्च दृग्गोचरीभवति । किञ्च तथा कृतानि तानि चिन्तनानि तद्विषयिणीमैतिहासिकीं स्थितिमादाय नैव प्रवृत्तानि । अतः प्रस्तुते शोधनिबन्धे न्यायवैशेषिकदर्शने आदाय अभावसम्बद्धं विचारं पुरस्कृत्य तद्विषयिणी मीमांसा प्रस्तुता वर्तते ।

## शोधबीजम् (शोधान्तरालम्)

तत्र तत्र ग्रन्थेषु न्यायवैशेषिकगतान् नैकविधान् विषयान् पुरस्कृत्य लसन्तेऽनेकानि चिन्तनानि जातानि । अथापि न्यायवैशेषिकदर्शनाभिमताभावपदार्थमादाय सम्यग् विश्लेषणं प्रायो न लभ्यते । अतो न्यायवैशेषिकसम्मताभावपदार्थगतस्याचार्यमतभेदविषयकस्यैतिहासिकस्थितेश्च तुलनात्मकतया कृतस्य चिन्तनस्याभाव एव शोधरिक्तता किंवा शोधबीजं खल्विह । अतस्तस्याः रिक्ततायाः पूरणाय शोधकार्यमदो जातम् ।

## समस्याकथनम्

यद्यपि सामान्यतो न्यायवैशेषिकदर्शनदृष्ट्या अभावविषयकं समीक्षणं बहुभिर्विद्वद्भिः कृतं लभ्यते, अथापि अभावतत्त्वपरिशीलनक्रमे ऐतिहासिकरूपेणाऽऽचार्याणां मतभेदविषयकं ससमीक्षमथ च वस्तुगत्या तत्तात्पर्यं परिशीलितं न लभ्यते । अतोऽस्मिन् विषये इमे प्रश्नाः मूलभूताः सन्ति–

(क) अभावपदार्थस्य मूलं स्वरूपं किम् ?

(ख) अभावस्य आवश्यकता औचित्यञ्च किम् ?

(ग) अभावपदार्थस्य भेदोपभेदाः के ?

## उद्देश्यकथनम्

न्यायवैशेषिकदर्शनदृष्ट्याभावपदार्थमादाय समीक्षणं वस्तुतत्त्वविवेचनञ्च विधाय तत्तात्पर्यप्रकाशनपूर्वकं समस्याकथने उपस्थापितप्रश्ननिराकरणपुरस्सरञ्च निष्कर्षणमेव प्रस्तुतस्य शोधलेखस्योद्देश्यं वरीवर्ति । तथा च मूलभूतमुद्देश्यमिदं लसते-

(क) अभावपदार्थस्य स्वरूपप्रतिपादनम् ।

(ख) अभावपदार्थस्य आवश्यकतानिदर्शनम् ।

(ग) अभावपदार्थस्य भेदोपभेदप्रदर्शनपूर्वकं निष्कर्षणम् ।

## अध्ययनस्यौचित्यम्

अनेन चाध्ययनेन न्यायवैशेषिकदर्शने आधारीकृत्याभावपदार्थमादायाग्रे चिन्तनाय विवेचनाय च साहाय्यसत्त्वादस्यौचित्यं सिद्ध्यति ।

## अध्ययनस्य सीमाङ्कनम्

न्यायवैशेषिकदर्शनयोः प्रतिपादिताभावतत्त्वविमर्शनमेव प्रस्तुतस्य शोधलेखस्य क्षेत्रं सीमा च वर्तते ।

## शोधविधिः

अत्र शोधकार्ये सामग्रीसङ्कलनविधिरध्ययनविश्लेषणविधिश्चेति शोधविधिर्द्विधा विभक्तो वर्तते । प्रसङ्गेऽत्रादावावश्यकसामग्रीसङ्कलनं कथं विहितमिति निर्दिश्यते चेदन्ते च सङ्कलितसामङ्ग्रीरादाय कतमञ्च विधिमवलम्ब्य शोधप्रबन्धः सम्पादित इति स्पष्टीक्रियते ।

### सामग्रीसङ्कलनविधिः

सम्पादितस्य शोधलेखस्य कृते आवश्यकसामग्रीणां सङ्कलनार्थं भूरिशः पुस्तकालयाः प्रयुक्ता वर्तन्ते । तत्र पुस्तकालयेषु प्राप्ता ग्रन्था एव प्रमुखशोधसामग्रीत्वेन गृहीता इति । अत्र तावच्छोधलेखे न्यायवैशेषिकदर्शनगतसंस्कृतमूलाकरग्रन्थाः प्राथमिकसामग्रीत्वेन गृहीताः सन्ति । संस्कृतेतरभाषास्वुपनिबद्धा न्यायवैशेषिकदर्शनगतविषयविवेचका ग्रन्थाः, एतद्विद्याविशारदैर्लिखिता लेखाश्च द्वितीयकसामग्रीत्वेन प्रयुक्ताः । एवमेव यथावश्यकमभावपदार्थविचक्षणैः सह संवादादिकमपि कृत्वा सामग्रीसङ्कलनं विहितमस्ति ।

### अध्ययनविश्लेषणविधिः

प्रस्तुते लघुनिबन्धे मूलतः समीक्षणात्मको विधिरवलम्बितो वर्त्तते । अस्मिँश्च निबन्धे शास्त्रनिर्दिष्टान् सिद्धान्ताँश्चाऽऽदाय तेषां विषयाणां विश्लेष्यत्वान्निगमनात्मकविधिरवलम्बित इति ज्ञायते । कथनेनाऽनेनात्र शोधलेखे गुणात्मकविधिरवलम्बित इत्यपि सिद्ध्यति ।

**सैद्धान्तिक आधारः**

शास्त्राभिमतानां प्रतिपादितानाञ्च तत्त्वानां सम्यग्ज्ञानाय तेषामभावोऽपि ज्ञेय एव । तदेव मनसि निधाय शास्त्रकारैरभावोऽपि व्याख्यातः । अत्र च लघुप्रबन्धेऽभावसम्बद्धं न्यायवैशेषिकशास्त्रगतसिद्धान्तमादाय तद्विश्लेषणव्यापार उपक्रान्तः । एतावताऽभावविमर्शनार्थमस्मिन् लेखेऽवलम्बितः सैद्धान्तिक आधारो न्यायवैशेषिकशास्त्रगर्भित एवेति पुष्यति । इतः परमभावस्य विश्लेषणमुपक्रम्यते ।

## विश्लेषणम्

**अभावपदार्थः**

भावपदं तावद् *भू सत्तायाम्* (पाणिनिः, धा.पा. १) इत्यस्माद्धातोः *भावे* (पाणिनिः, अष्टा. ३।३।१८) इति सूत्रेण घञि निष्पद्यते । तत्र 'भवनमेव भावः, भवतीति भावः' इत्यादिषु बहुष्वर्थेषु भावपदं निष्पद्यते । भावश्चासौ पदार्थो भावपदार्थः । भावपदार्थो नामास्तित्ववान् पदार्थ इति । तद्वैपरीत्येन न भावोऽभावः, भावभिन्न इति यावत् । अतश्च भावभिन्नत्वमभावत्वमित्यभावसामान्यलक्षणम् । स च नञ्पदजन्यप्रतीतिविषयः । 'अस्ति' इति प्रतीतेः कश्चन विषय आवश्यक इति तु नाविदितं समेषां विदुषाम्, तथैव 'नास्ती'ति प्रतीतेरपि कश्चन विषयोऽपेक्षित एव, सर्वस्या अपि प्रतीतेर्निर्विषयकत्वाभावात् । स च विषयोऽभाव एवेति ज्ञेयम् । भट्टजयन्तो न्यायमञ्जर्यां तदेव ध्वनयन्नाह– *सत्प्रत्ययगम्यो हि भाव इष्यते, असत्प्रत्ययगम्यस्त्वभाव इति । तदिदमुक्तं सदसती तत्त्वमिति* (भट्टः, १९८२, पृ.९३) । विश्वनाथपञ्चाननभट्टाचार्योऽभावं विवृण्वानश्चष्टे– *अभावत्वं द्रव्यादिषट्कान्योन्याभाववत्त्वम्* ( भट्टाचार्यः, २०५२, पृ.५९) अर्थाद् द्रव्यादिषट्कभावपदार्थभिन्नत्वमभावत्वम् । भावभिन्नत्वमभावत्वमिति यावत् । लक्षणमिदमन्योन्याभावघटितमतः समवायसामानाधिकरण्यान्यतरसम्बन्धावच्छिन्नप्रतियोगिताकसत्ताभावत्वम् अभावत्वम् इति केचित् । वस्तुतस्तु प्रमेयदृष्ट्या त्वभावस्तावद् वाक्यार्थ एव । यतो ह्यभावपदे 'न भावः' इत्येतत्पदद्वयं विद्यते । अतो वाक्यङ्खलु तत् । तज्जन्योऽभावार्थः । एतावताऽभावो हि वाक्यार्थः । एतन्नाम भावभिन्नः पदार्थोऽभावः । अभावपदार्थस्तावत् सापेक्षो भवति । एतन्नामाभावपदार्थज्ञानाय प्रथमतो भावपदार्थो ज्ञेयो भवति । भावपदार्थाधीनो ह्यभावपदार्थः । कस्यचनास्तित्ववतः पदार्थस्य नास्तित्वमेवाभावः ।

वैशेषिकदर्शने उद्देशसूत्रे नोद्दिष्टत्वादभावपदार्थो न कणादसम्मतोऽपितु शिवादित्यमिश्रादिभिः कतिपयैरानन्तरकालिकैर्विद्वद्भिस्तद्योजित इति केचिन्नवीना दार्शनिका आचक्षते । तेष्वन्यतमः सर्वपल्ली राधाकृष्णन्महोदयः । स च व्याचष्टे यत् काणादसूत्रेषु यथाकालमन्यानि सूत्राणि संयोजितानि । कतिपयानि च पुनः काणादसूत्राणि न प्रशस्तपादेन व्याख्यातानि । मुनिः कणव्रतो मूलतस्त्रीन् पदार्थानुरीकृत्य तद्वर्णने प्रवृत्तः । तदितरे त्रयः पदार्थाः प्रशस्तदेवेन योजिताः । आहत्य

षट् पदार्थाः सञ्जाताः । एवमेव यथाकालमभावाख्यः सप्तमः पदार्थोऽपि विद्वच्चञ्चुभिर्योजित इति[1] (राधाकृष्णन, २०१७, पृ.१७९- द्वितीयो भागः) । वैशेषिकसूत्रे नवमाध्याये उलूकेनाभावस्य व्याख्यातत्वात्तदस्वीकारे व्याख्यानस्यासम्भवाच्च राधाकृष्णनमहोदयाभिभाषितमुपर्युक्तं वचः प्रमादजन्यमप्रामाणिकञ्चेति वक्तुं सुशकम् । नवमेऽध्याये प्रागभावादीनामभावविशेषाणां व्याख्यातत्वादवश्यमपि कणभुजा अभावाख्यः सप्तमः पदार्थ ऊरीकृत इति सिद्ध्यति । ननु तर्हि किमर्थमुद्देशसूत्रे नोद्दिष्ट इति चेत्, सत्यं परमभावस्य प्रतियोगिनिरूपणाधीननिरूपणीयत्वात्तत्रैव नोद्दिष्टो न वा व्याख्यातः– *अभावस्तु स्वरूपवानपि पृथङ्नोद्दिष्टः प्रतियोगिनिरूपणाधीननिरूपणत्वान्न तु तुच्छत्वात्* (उदयनाचार्यः, १९८०, पृ.४६) । किञ्च *द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानाम्* … (कणादः, वै.सू. १।१।४) इत्येतत्स्वरूपके सूत्रे स्फुटं पदार्थानामेवोद्देशोऽभावस्य तु वाक्यार्थत्वान्नोद्देशः । अतो यथाक्रमं समवायानन्तरं न निरूपणमभावस्य, मध्ये प्रसङ्गात्तु न न्यक्कृत इति ध्येयम् । ननु अभावानामधिकरणात्मकत्वं लाघवादिति चेन्न, अनन्ताधिकरणात्मककल्पनापेक्षया अतिरिक्ताभावकल्पनाया एव लघीयस्त्वात् । किञ्चाभावस्याधिकरणात्मकत्वे आधाराधेयपदार्थयोरभावेन घटाभाववद्भूतलमिति प्रामाणिकप्रतीतिर्न स्यात्, अपि च अभावस्याधिकरणात्मकत्वे पृथिव्यां वर्तमानस्य शब्दाभावस्य श्रोत्रेण ग्रहणं न स्यात् । श्रोत्रस्य पृथिवीग्राहकत्वाभावेन तदभिन्नशब्दाभावस्याप्यग्राहकत्वप्रसङ्गात् । एवमेव गन्धरसाद्यभावानामपि तत्तदिन्द्रियग्राह्यत्वं न स्यात् । अतोऽभावोऽतिरिक्त एवाऽङ्गीकरणीयः । प्रसङ्गेऽस्मिन् न्यायमञ्जरीकारस्याभिव्यक्तिं स्मरामः । प्राभाकरानुद्दिश्योपहसन् स चाह यत्– भवतां वचनं श्रुत्वा वयं लज्जामनुभाव इति–

**यैस्तु मीमांसकैस्सद्भिरभावो नाभ्युपेयते ।**
**प्रमादेनामुना तेषां वयमप्यद्य लज्जिताः ॥** (भट्टः, १९८२, पृ.९४) ।

अत्र तावद् भट्टजयन्तेन कृतं बौद्धमतखण्डनसम्बद्धं चिन्तनमपि हृद्यम् । तत्र बौद्धाः कथयन्ति यद् भावस्य ज्ञानजनकत्वमिवाभावस्यापि ज्ञानजनकत्वे द्वयोरैक्यमभ्युपगम्यताम् । अत्रोपहसता न्यायमञ्जरीकृतोच्यते– भवन्तस्तत्त्वदर्शिनो मूर्खाः ! किं भोः ! तावदपि न विचार्यते यद् भावाभावयोः प्रतीतिभेदाद् भेदः सिद्ध्यति । अथ च यथा ज्ञानजनकत्वाभेदेऽपि सुखदुःखयोर्भेदस्तु प्रतीतिसाक्षिक एव । तथैव भावाभावयोर्ज्ञानजकत्वाविशेषेऽपि प्रतीतिभेदाद् भिद्येते । प्रतीतिभेदाद् विषयभेदस्तु भवताप्युरीक्रियत एव–

1. Since Kautilya does not refer to the Vaiśeṣika under Ānvikṣiki, it is said that the system was formulated later than 300Bc. Kanāda's Sūtra seems to have received additions from time to time. Some of the sutras now found in his treatise were not commented on by the scholiast, Praśastapāda, which indicates that at the time the latter commended on the sūtra, they were not included in it. While Kanād mentioned olny three categories, Praśastapād added three more, and still later, the category of non-existence -abhāv was introduced. Praśastapāda added seven qualities to the list mentioned by Kanāda.

*ननु भाववदेष ज्ञानजनकः सन्नभावो न भावाद्विशिष्यते । अहो निपुणदर्शी देवानाम्प्रियः । प्रतीतिभेदश्चास्ति । तत्र प्रतीयमानौ भावाभावौ न भिद्येते इति कथमेवं भवेद् ? अयि रे मूढÞ ! ज्ञानजनकत्वाविशेषेऽपि रूपरसौ कथं भिद्येते, प्रतीतिभेदादिति चेद् ? भावाभावावपि जनकत्वधर्मसामान्येऽपि प्रतीतिभेदादेव भिद्येताम् । न हि प्रतिभास्यभेदमन्तरेण प्रतिभासभेदो भवतीति भवताप्यभ्युपगतम् ।*

**प्रामाण्यं वस्तुविषयं द्वयोरर्थभिदां जगौ ।**
**प्रतिभासस्य भिन्नत्वादेकस्मिँस्तदयोगतः ॥** *इति ।*

*तस्मादस्तीति प्रतीतेरेव भावः । नास्तीति प्रतीतेरभावो भूमिरित्यभ्युपगम्यताम्* (भट्टः, १९८२, पृ.९४) ।

भगवच्छङ्करपादा अपि बृहदारण्यकभाष्ये पटनिष्ठस्य घटभेदस्य पटादन्यत्वे तद्भेदोऽपि तथेत्यनवस्थादोषापत्तेः घटभेदः पट इत्येवोरीकर्तव्यम् इत्याहुः । अथ च तत्रभवद्भिः शङ्कराचार्यैः प्रागभावध्वंसात्यन्ताभावानामपि तत्तदधिकरणस्वरूपत्वमेव सिद्धान्तितम् । तत्राप्युपरि सन्दर्शितदोषापत्तेर्न तद् युक्तिसहम् ।

**अभावभेदः**

यथा भावस्य व्यवहारो भवति, तथैवाभावस्यापि व्यवहारो जायते । तथाभावव्यवहारस्य चतुर्विधत्वदर्शनात् तद्विषयीभूतोऽभावोऽपि चतुर्धैव भिद्यते । एतन्नाम प्रतीतिभेदेनाभावो भिद्यत इति यावत् । अभावपदार्थस्तावत् प्रथमतः संसर्गान्योन्याभावभेदाद् द्विविधः । न भाव अभावः इत्यत्रस्थस्य नञोऽर्थः संसर्गाभावः, अन्योन्याभावश्चेति नञ्वादे दीधितिकारेण प्रोक्तम् । तावता चाभावस्य द्वैविध्यं स्पष्टीभवति । न चाभावो द्विविधो मास्तु, लाघवात् सर्वाभावसाधारण्यादभावबुद्धिविषयीभूताभावत्वेनैकविधोऽस्तु इति वाच्यम् 'अत्र घटो नास्ति' इत्येतादृशाभावे 'घटः पटो ने'त्येतादृशाभावे च वैलक्षण्यदर्शनात् तथानुभवाच्च । किञ्च क्वचिदनुयोगितावाचकपदोत्तरे सप्तमीविभक्तिप्रयोगाद् यथा 'भूतले घटो नास्ति, कपाले घटो ध्वस्तः' इति । क्वचिच्च प्रतियोगितापदोत्तरे प्रथमाविभक्तिप्रयोगाच्चाभावभेदोऽनुभवसिद्धः । अभावस्यैकत्वे अनुयोगिप्रतियोग्यादिपदानामेकविभक्तिकत्वं सम्भवेत्, तद्विपरीतदर्शनादर्थवैलक्षण्यमपि सुस्थम् । अर्थवैलक्षण्यमन्तरा विभक्तिवैलक्षण्यासम्भवात् । नन्वभावस्य नञ्पदजन्यप्रतीतिविषयत्वमिति तूक्तपूर्वमेव । अथ च तत्सादृश्य-अभाव-तदन्यत्व-तदल्पता-अप्राशस्त्य-विरोधभेदेन नञर्थस्य षाड्विध्यमित्यापामरबोध्यम्—

**तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।**
**अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ॥** (भट्टः, १९९२, पृ.५५)

उदाहरणानि च यथाक्रम्— (क) तत्सादृश्यम्— अब्राह्मणः, ब्राह्मणसदृश इत्यर्थः, (ख) अभावः— अपापम्, पापाभाव इत्यर्थः, (ग) तदन्यत्वम्— अघटः, घटभिन्नं ›व्यम् इत्यर्थः, (घ)

तदल्पता- अनुदरा कन्या, अल्पोदरी इत्यर्थः, (ङ) अप्राशस्त्यम्– अकार्यम्, अप्रशस्तं कार्यम् इत्यर्थः, (च) विरोधः– असुरः, सुरविरोधी इत्यर्थः । तथा सत्यभावस्यापि षाड्विध्यं स्यात्, कथं द्वैविध्यं चातुर्विध्यं वेति न वाच्यम् संसर्गाभावान्योन्याभावरूपाभावद्वयेन कार्यनिर्वाहान्न खलु षाड्विध्यमुरीकर्तव्यमिति विवेकः ।

तत्र संसर्गाभावान्योन्याभावयोराद्यश्च पुनः प्रागभाव-प्रध्वंसाभाव-अत्यन्ताभावभेदात् त्रिविधः । आहत्य चतुर्विधोऽभावः । एतत् सर्वं स्पष्टीकुर्वन् कारिकावलीकार आह-

**अभावस्तु द्विधा संसर्गाऽन्योन्याभावभेदतः ।**

**प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च ॥**

**एवं त्रैविध्यमापन्नः संसर्गाऽभाव इष्यते ।** (भट्टाचार्यः, वै.२०५२, पृ.५९)

विश्वनाथपञ्चाननभट्टाचार्येणाभावस्य प्रकृतिं हृदि निधायादौ द्विधा विभज्य तत्रैको वर्गः पुनस्त्रेधा विभक्तः । अयं विभागो न खलु तत्रभवतैदम्प्राथम्येनोद्भावितोऽथापि मिश्रकेशवेनापि विभागोऽयमेवाचरित आसीत् । पश्यामस्तावत्तर्कभाषागतामिमां केशवमिश्राभिव्यक्तिम्– *स च अभावः सङ्क्षेपतो द्विविधः- संसर्गान्योन्याभावश्चेति । संसर्गाभावोऽपि त्रिविधः– प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावश्चेति* (मिश्रः, १९९५, पृ.५२२) । एवमेव तर्कामृतावपि अयमेव पन्था अनुसृतः– *अभावो द्विविधः– संसर्गाभावोऽन्योन्याभावश्च । आद्यस्त्रिविधः ...* (भट्टाचार्यः, वै.२०६७, पृ.४५) । लक्षणावल्यान्त्वभावसामान्यलक्षणमभिधाय प्रागभावप्रध्वंसाभावात्यन्ताभावान्योन्याभावभेदेन साक्षाच्चतुर्धा विभागो लभ्यते– *नञर्थप्रत्ययविषयोऽभावः । स चतुर्धा भिद्यते– प्रागभावः प्रध्वंसाभावोऽन्योन्याभावोऽत्यन्तभावश्चेति* (उदयनाचार्यः, १९६३, पृ.२६) । एतदेवानुसृतं वर्तते तर्कसङ्ग्रहे च– *अभावश्चतुर्विधः– प्रागभावः प्रध्वंसाभावोऽन्योन्याभावोऽत्यन्ताभावश्चेति* (भट्टः, २००३, पृ.२१) । विभागेऽत्र पदविन्यासोऽपि लक्षणावल्यामिव दृग्गोचरीभवति । क्रमोऽयं सूत्रकारसरणीमनुसरति । सूत्रकारेणाभावस्तावत् प्रागभावप्रध्वंसाभावान्योन्याभावात्यन्ताभावभेदेन वर्णितो लभ्यते । दशपदार्थी इत्याख्ये ग्रन्थेऽभावस्य पृथक्लक्षणं समुपस्थाप्य पञ्चविधत्वं प्रतिपादितं विद्यते । तत्र तावत् प्रागभावप्रध्वंसाभावान्योन्याभावसंसर्गाभावात्यन्ताभावभेदेन पञ्च अभावा उद्दिष्टाः सन्ति– *को नामाभावपदार्थः ? अभावपञ्चकमभावपदार्थः । के तावत् पञ्चाभावभेदाः ? प्रागभावः प्रध्वंसाभावोऽन्योन्याभावः संसर्गाभावोऽत्यन्ताभावश्च* (झा, १९७७, पृ.७) । परं न्यायमञ्जरीकारस्तु प्रागभावप्रध्वंसाभावभेदेनाभावो द्विविध इत्यवोचत्– *स च द्विविधः । प्रागभावः, प्रध्वंसाभावश्चेति* ( भट्टः, १९८२, पृ.९९) । अन्ये त्वन्योन्याभावमत्यन्ताभावञ्चादाय चतुर्विधोऽभाव इत्याचक्षते । केचन पुनरपेक्षाभावः सामर्थ्याभावश्चेत्याहत्य षडभावान् स्वीकुर्वन्तीत्यपि सूचयति तत्रभवान् नैयायिकप्रवरो जयन्तः– *चतुर्विध इत्यन्ये । इतरेतराभावः, अत्यन्ताभावश्च तौ च द्वाविति । षट्प्रकार इत्यन्ये । अपेक्षाभावः सामर्थ्याभावः, ते च चत्वार इति* (भट्टः, १९८२, पृ.९९) । स्वमते तत्त्वतोऽन्योन्याभावः

प्रध्वंसाभाव इत्येतदभावद्वयमिति निष्कृष्टिं प्रस्तुवन् तदितरानभावाँश्च तत्रैव किञ्च विशेषतः प्रागभावेऽन्तर्भावयितुं युक्तिं प्रदर्शयन्नाह तत्रभवान् न्यायमञ्जरीकृज्जयन्तः–

**प्रागात्मलाभान्नास्तित्वं प्रागभावोऽभिधीयते ।**
**उत्पन्नस्यात्महानन्तु प्रध्वंस इति कथ्यते ॥**
**न प्रागभावादन्ये तु भिद्यन्ते परमार्थतः ।**
**स हि वस्त्वन्तरोपाधिरन्योन्याभाव उच्यते ॥**
**स एवावधिशून्यत्वादत्यन्ताभावतां गतः ।**
**अपेक्षाभावता तस्य देशोपाधिनिबन्धना ॥**
**सामर्थ्यं पूर्वसिद्धञ्चेत् प्रध्वंसे तदभावधीः ।**
**नो चेत्तर्हि विशेषोऽस्य दुर्लभः प्रागभावतः ॥**
**उत्पन्नस्य विनाशो वा तदनुत्पाद एव वा ।**
**अभावस्तत्त्वतोऽन्ये तु भेदास्त्वौपाधिका मताः ॥** (भट्टः, १९८२, पृ.९९)

तथा सत्यपि न्यायवैशेषिकजगत्यभावस्य चातुर्विध्यप्रसिद्धेस्तदेवानुसृतमत्र लेखनव्यापारे ।

अभावपदार्थो हि नञ्पदवाच्य इति तु नाविदितं समेषाम् । परं चतुर्विधेष्वभावेषु नियतो नञः प्रयोगस्त्वत्यन्ताभावान्योन्याभावयोरेव । अतो वस्तुतस्तु मूलभूतोऽभावो द्विविध एवेति केचनाभावपदार्थरहस्यविदः । वस्तुतस्तु 'अत्र घटो भविष्यति', अथ च 'घटोऽयं नष्टः' इत्युभयत्रापि साक्षान्नञः प्रयोगाभावेऽपि स्फुटमभावस्य व्यवहारात् क्रमशः प्रागभावः प्रध्वंसाभावश्चेत्यभावद्वयमपि सिद्ध्यति । केवलं भूतलादौ 'घटो भविष्यति, घटो नष्टः' इति व्यवहाराभावाद् उभावप्यभावौ प्रतियोगिसमवायिकारणवर्तिनाविति तद्विदः । अभावस्य चतुर्विधत्वेऽपि वस्तुतस्त्वत्यन्ताभावस्यैव लोकेऽभावत्वेन व्यवहारो दृग्गोचरीभवति । अनेन चात्यन्ताभावस्यैव प्रामुख्यं ज्ञायते । किञ्च सर्वस्यापि चिन्तनस्य निरतिशयसुखप्राप्तेरेव फलत्वान्न्यायवैशेषिकयोरपि तथैवेति तु स्वाभाविकः । तच्च मुक्तिमोक्षापवर्गनिर्वाणादिभिः पदैर्ज्ञाप्यते । न्यायवैशेषिकयोः मुक्तेर्जागतिकसुखदुःखयोरभावात्मकत्वात् किंवा सुखदुःखात्यन्ताभावात्मकत्वादत्राप्यभावेष्वत्यन्ताभावस्यैव प्रामुख्यं सिद्ध्यति । इतोऽत्र लेखनव्यापारे तेषामभावविशेषाणां विश्लेषणमुपक्रम्यते–

**अन्योन्याभावः**

'रामो न श्यामः' अर्थात् 'रामः श्यामाद् भिन्नः' एवमेव 'श्यामो न रामः' अर्थात् 'श्यामो रामाद् भिन्नः' इत्येतादृशोऽभाव एवान्योन्याभावः । अयमभावस्तावद् भेदरूपः । 'रामो न श्यामः' इत्यत्र श्यामस्य भेदो रामे चेत् 'श्यामो न रामः' इत्यत्र रामस्य भेदः श्यामे विद्यते । स्वस्मिन्नेव स्वस्य भेदो न जायते । परन्तु स्वभिन्ने वस्तुनि स्वस्य भेदो जायते । तादृशो भेद एवान्योन्याभावः । एतावता परिष्कृतलक्षणन्त्विदम्- *तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावोऽन्योन्याभावः*

(उदयनाचार्यः, १९६३, पृ.२६) । प्रतियोगितावच्छेकारोपपूर्वकप्रतीतिविषयाभावोऽन्योन्याभाव इत्यर्थः । अथ च प्रतियोगितावच्छेदकासमानाधिकरणोऽभावोऽन्योन्याभाव इति केषाञ्चन मतम् । अन्योन्याभावं विवृण्वानः सूत्रकारः कणभुगाचष्टे– *सच्चासत्* (कणादः, वै.सू. ९।१।४) अर्थात् सतोऽसत्त्वेन यो व्यवहारो जायते, तेनाऽन्योन्याभावो ज्ञाप्यत इति । यथा रामः सन्नपि श्यामत्वेन नास्ति । रामस्य रामत्वेनास्तित्वेऽपि श्यामत्वेन नास्तित्वमिति यावत् । तत्र सम्बन्धस्तु तादात्म्यमेव । यतो हि यच्च वस्तु विद्यते, अथापि अविद्यमानमिव व्यवह्रियते चेत्, तदा सदपि असत्त्वेन कथं व्यवह्रियते इति जिज्ञासा स्वाभाविकी । तत्रोत्तरं विद्यते यत्- तद्रूपेण तु लसते परमन्यद्रूपेण नास्ति । एतन्नाम 'घटो न पटः (पटाद् भिन्नः)' इत्यत्र घटो घटत्वेन सन्नपि पटत्वेन नास्ति इत्येव फलितार्थः । तत्र पटभेदो घटेऽस्ति । भेदोऽप्यभावविशेष एव । यतो ह्यभाववाचकं नञ्पदम् । 'घटो न पटः' इत्यत्र 'घटे पटाभावः' इत्येव बोधः । तावता पटस्याभावो घटे आगतः । यस्याभावः स प्रतियोगी इति नियमेन पटस्याभावे गृहीते पट एव प्रतियोगी । प्रतियिगिनि प्रतियोगिता स्वाभाविकी । निरवच्छिन्नाया अभावीयप्रतियोगिताया असम्भवादस्या अपि प्रतियोगिताया अवच्छेदकः स्यादेव । एतादृशेषु स्थलेषु द्विविधोऽवच्छेदको मन्तव्यो भवति– धर्मः सम्बन्धश्च । अत्र तावत् पटे प्रतियोगितायां सत्यां नान्यत्रस्था प्रतियोगिता गृह्यते । तज्ज्ञापनार्थं पटत्वावच्छिन्ना प्रतियोगिता इति प्रयोगोऽवलम्ब्यते नैयायिकैः । तावता च पटनिष्ठप्रतियोगितायाः पटत्वावच्छिन्नत्वे पटत्वञ्च प्रतियोगितावच्छेदकं भवति । एतावता पटत्वधर्म एव पटनिष्ठायाः प्रतियोगिताया अवच्छेदकधर्मः । अथ च केन सम्बन्धेन घटो न पट इति चेत् 'तादात्म्येन' इत्येव सुवचम् । यतो हि घटः घटत्वेन सन्नपि पटत्वेन नास्ति । पटत्वेन नाम पटरूपेण । तादात्म्यपदघटकमात्मपदं रूपं द्योतयति । किं रूपं नाम तद्रूपमेव । तद्रूपं नामात्र प्रसङ्गे पटरूपमिति यावत् । पटपदार्थः तत्पदेन द्योत्यते चेद् रूपञ्चात्मत्वेन । एतावता पटरूपं नाम तदात्मा । पटरूपत्वञ्च तादात्म्यम् । तदेव सम्बन्धत्वेन परिकल्पितम् । एतावता घटस्य एतद्रूपत्वेन (घटत्वेन) सत्त्वेऽपि तद्रूपत्वेन (पटत्वेन = तादात्म्येन) असत्त्वाद् 'घटो न पटः' इति व्यवहारः सिद्ध्यति । तावता च तादाम्यमेव किंवा तद्रूपत्वमेव घटगतस्य पटाभावस्य निरूपिकायाः प्रतियोगिताया अवच्छेदकः सम्बन्धो भवति । एतावता 'घटो न पटः' इत्यस्य परिष्कृतं स्वरूपमिदम्– तादात्म्यसम्बन्धावच्छिन्नपटत्वावच्छिन्नपटनिष्ठप्रतियोगिताकाभाववान् घटः । अयमभावो वस्तुतस्तु नित्यः । यतो हि न कदाप्यत्र जगति घटः पटत्वेन भासते, पटो वा घटत्वेन भासते । अथापि घटो न पटत्वेन, पटो वा न घटत्वेनेत्येव वस्तुगतिः । अतः कुत्रचनान्योन्याभावपरिचायनावसरेऽत्यन्ताभावभिन्नत्वे सति नित्याभावत्वमन्योन्याभावत्वमित्यपि केचनापश्चिमविपश्चिदोऽवोचन् । तादात्म्यपदञ्च बहुत्रेत्थं व्याकृतं लभ्यते– स चासौ आत्मा तदात्मा किंवा प्रसङ्गेऽत्र तस्य आत्मा तदात्मा, तदात्मनो भावस्तादाम्त्यम् । वस्तुतस्तु अत्रापि आत्मा नाम रूपमेव । तस्य रूपं नाम तद्रूपम्, तच्च तस्य स्वरूपमेव । तस्य भावस्तद्रूपत्वमिति । तदेव तादात्म्यमिति फलितार्थः । तावता च 'घटो न पटः' इत्यत्र घटस्त्वस्ति परं पटत्वेन नास्ति

इत्येवार्थो निस्सरति । एतावता घटः पटत्वेन किंवा पटरूपत्वेन नास्ति इत्यत्र पटरूपत्वमेव तादात्म्यम् । तदेव पटनिष्ठायाः प्रतियोगिताया अवच्छेदकमिति । तादात्म्यं व्याख्यायन् भट्टगदाधर आह– *अभेदस्तादात्यम् । तच्च स्ववृत्ति असाधारणो धर्मः । असाधारण्यञ्च एकमात्रवृत्तित्वम् । तच्च स्वसामानाधिकरण्यस्वप्रतियोगिकवृत्तित्वोभयसम्बन्धेन भेदविशिष्टं यत्तदन्यत्वम् । इति एकमात्रवृत्तिधर्म एव विशेषणविभक्तेरर्थः* (भट्टाचार्यः, १९८३, पृ.७३) । प्रसङ्गेऽस्मिन् *सच्चासत्* (कणादः, वै.सू. ९।१।४) इति सूत्रव्याख्यानावसरे निःसृतं वैशेषिकसूत्रोपस्कारकारवचनमिदं गाढं चिन्तनीयम्–

> *यत्र सदेव घटादि असदिति व्यवह्रियते तत्र तादात्म्याभावः प्रतीयते । भवति हि असन्नश्वो गवात्मना । असन् गौरश्वात्मना । असन् पटो घटात्मना । अघटः पटः । अनश्वो गौः । अगौरश्व इत्यादि प्रतीतिः । तदस्याम् 'अश्वान्योन्याभाववान् गौः', 'पटान्योन्याभाववान् घटः' इत्यन्योन्याभाव एव तादात्म्याभावापरनामा भासते । तत्र तादात्म्यं प्रतियोगितावच्छेदकम् । प्रतियोगिसमानाधिकरणश्चायमभावः, भवति हि घटो न भूतलमिति प्रतीतिः । नित्यश्च, कदाचिद्धि घटपटयोस्तादात्म्यासम्भवात्* (मिश्रः, वै.२०६४- ९।१।४) ।

प्रसङ्गेऽस्मिन् एतत् स्मर्तव्यं यदन्योन्याभावे कीदृशोऽभावो ग्राह्यः ? कश्च तत्र प्रतियोगी भवति ? इत्यत्र लभ्यतेऽभियुक्तानां सूत्रीभूतं निर्देशात्मकं वचनमिदम्– 'यद्धर्मावच्छिन्नवाचकपदोत्तरं नञादिपदं श्रूयते, तेन तद्धर्मावच्छिन्नप्रतियोगिताकभेदावगाहनं क्रियते' । अदो वचो न्यायशास्त्रे नितरां प्रथितं विद्यते । एतदनुसारेणैव नैयायिकाः कः प्रतियोगी ? इति निर्णयन्ति । उक्तस्य निर्देशात्मकस्य वचसस्तात्पर्यमिदम्– यत्पदोत्तरं नञ्पदं श्रूयते, तत् पदं प्रतियोगिवाचकम् । तावता च 'घटो न पटः' इत्यत्र घटपदोत्तरं नञ्पदं श्रूयते, अतोऽत्र घट एव प्रतियोगी, तत्रस्था प्रतियोगिता घटनिष्ठा । तस्या घटनिष्ठायाः प्रतियोगिताया अवच्छेदकधर्मो घटत्वम् । अवच्छेदकसम्बन्धश्च तादात्म्यमिति प्रतिपादितपूर्वमेव । एतावता 'घटो न पटः' इत्यस्य परिष्कृतं स्वरूपमिदं निष्पद्यते– तादात्म्यसम्बन्धावच्छिन्नघटत्वावच्छिन्नघटनिष्ठप्रतियोगिताकाभाववान् पटः । ननूपरिष्टाद् व्याख्याने पटत्वधर्मः प्रतियोगितावच्छेदकत्वेन गृहीतोऽत्र च पुनः घटत्वमिति समानानुपूर्वीके वाक्ये परस्परं विरोधः समजनि इति चेत् सत्यम्, परं प्रतीतिभेदेन परिष्कारभेदः । प्रतीतिभेदश्च न स्वतोऽपि च विवक्षानुसारेण । अतो यथाप्रतीति उभयमपि सिद्धं शुद्धञ्चेति विवेकः । अथ च 'घटः पटो न' इत्यत्र तु पटपदोत्तरं नञ्पदस्य सत्त्वात् पटस्यैव प्रतियोगित्वम् । अपि च पटनिष्ठायाः प्रतियोगितायाः तस्यैवावच्छेदकत्वात्परिष्कृतं स्वरूपमिदं सिद्ध्यति– तादात्म्यसम्बन्धावच्छिन्नपटत्वावच्छिन्नपटनिष्ठप्रतियोगिताकाभाववान् घटः । अत्र भेदबीजञ्च 'घटो न पटः, घटः पटो न' इत्यत्र भेदस्तु प्रतीतिसाक्षिक एवेति तेषां हृदयम् । तात्पर्याभेदेनाभेद इतीतरेषाम् । अत्र च वस्तुतत्त्वं विद्वच्चञ्चूनां चिन्तकानामाकलनीयम् ।

**संसर्गाभावः**

तत्र संसर्गाभावत्वम् अन्योन्याभावभिन्नत्वम् । प्रागभावप्रध्वंसाभावात्यन्ताभावभेदेन त्रैविध्यं संसर्गाभावस्येत्युक्तपूर्वमेव । तदेवात्र क्रमशो विविच्यते–

***प्रागभावः***

संसर्गाभावे चानादिः सान्तो विनाश्यभावो वा प्रागभावः, यथा 'घटो जातः' इति । केशवमिश्रः प्रागभावं व्याख्यायनाह– *उत्पत्तेः प्राक् कारणे कार्यस्याभावः प्रागभावः । यथा तन्तुषु पटाभावः* ( मिश्रः, १९९५, पृ.५२३) । एतन्नाम वस्तुन उत्पत्तेः पूर्वं तस्य योऽभावो भवति, स एव प्रागभावः । स चाभावोऽनादिर्भवति, यदा हि कार्यमुत्पद्यते, तदा सोऽभावो नश्यति । अतोऽयमाभावोऽनादिः सान्त इच्युच्यते । वस्तुतस्त्वभावोऽयं पूर्वावस्थारूपः । एतन्नाम कार्योत्पत्तेः पूर्वमेवास्य स्थितिः, कार्योत्पत्तेर्नाश्यत्वात् । आचार्यस्तू*त्तरकालावधिरभावः प्रागभावः* (उदयनाचार्यः, १९८०, पृ.२६) इत्यवोचत् । तत्पदकृत्यं कुर्वाणः शशिनाथशर्मा व्याचष्टे यद् *ध्वंसप्रतियोग्यभाव इत्यर्थः* (पृ.२६) । एतन्नाम विनाश्यभाव इति यावत् । सूत्रकारकणादः- *क्रियागुणव्यपदेशाभावात् प्रागसत्* (कणादः, वै. सू. ९।१।१) अर्थाद् उत्पन्नस्य वस्तुन उत्पत्तेः पूर्वं तत्क्रियाया गुणस्य च व्यवहाराभावाद् उत्पत्तेः पूर्वं तस्य प्रागभाव इति । अस्य च प्रत्यक्षं न संयोगसमवायादिना सम्बन्धेनाथापीन्द्रियसम्बद्धविशेषणतयेति विवेकः– *न च संयोगसमवायान्तरघटिता प्रत्यासत्तिरत्र प्रभवति, तस्मादिन्द्रियसम्बद्धविशेषणता प्रत्यासत्तिरत्र तन्त्रम्* (मिश्रः, वै.२०६४- ९।१।१) ।

***प्रध्वंसाभावः***

सादिरनन्तो जन्याभावो वा प्रध्वंसाभावः, यथा घटो नष्टः । तर्कभाषाकृत् प्रध्वंसाभावं व्याख्यायन्नाह– *उत्पन्नस्य कारणेऽभावः प्रध्वंसाभावः* (मिश्रः, १९९५, पृ.५२३) । एतन्नाम वस्तुनो नाशानन्तरं तस्य योऽभावो जायते, स एव प्रध्वंसाभावः । स चाभावः सादिनन्तः, यदा हि वस्तु नश्यति, तदा सोऽभाव उत्पद्यते । अतोऽयमभावः सादिरनन्त इच्युच्यते । वस्तुतस्त्वभावोऽयमुत्तरावस्थारूपः । एतन्नाम वस्तुनाशानन्तरमेवास्य स्थितिः, वस्तुनाशादुत्पत्तेः । उदयनाचार्यस्तु *पूर्वकालावधिरभावः प्रध्वंसाभावः* (उदयनाचार्यः, १९८०, पृ.२६) इत्यवोचत् । तत्पदकृत्यं कुर्वन् शशिनाथशर्मा व्याचष्टे यद् *प्रागभावप्रतियोग्यभाव इत्यर्थः* (पृ.२६) । एतन्नाम जन्योऽभाव इति यावत् । प्रध्वंसाभावविषये सूत्रकारो ब्रूते- *सदसत्* (कणादः, वै.सू. ९।१।२) अर्थात् सतो नाशजन्योऽभाव एव प्रध्वंसाभाव इति ।

एतन्नाम यथा वस्तुन उत्पत्तेः पूर्वं प्रत्यक्षादिना प्रमाणेन कार्यस्यासत्त्वं ज्ञायते, तथैव मुद्गरादिप्रहारजन्यनाशानन्तरमपि कार्यादिकमसदिति प्रतीयते, तथाप्रतीतिविषय एव प्रध्वंसाभावः । प्रसङ्गेऽस्मिन् वैशेषिकसूत्रोपस्कारकारवचनरचनमिदं ध्येयम्–

> *यथा कारणव्यापारात् पूर्वं प्रत्यक्षानुमानाभ्यां कार्यस्यासत्त्वं प्रमीयते, तथा विनाशकस्य मुद्गरादेर्व्यापारानन्तरं सदेव कार्यं घटादि इदानीमसदिति प्रत्यक्षानुमानाभ्यामेव प्रमीयते ।*

*भवति हि घटो नष्टो ध्वस्त इदानीं श्रुतपूर्वो गकारो नास्तीत्यादिधीरिति भावः* (मिश्रः, वै.२०६४- ९।२।२) ।

ननु ध्वंसाभावो न प्रतियोगिभिन्नोऽथापि प्रतियोग्यवस्थाविशेष इति चेन्न, अभावस्य क्रियागुणव्यवहाराभावाद् वस्तुनश्च तथा व्यवहाराद् ध्वंसाभावो ह्यर्थान्तरम्– *असतः क्रियागुणव्यपदेशाभावादर्थान्तरम्* (कणादः, वै.सू. ९।१।३) ।

***अत्यन्ताभावः***

अत्यन्ताभावं विवृण्वानः कणभुगाह– *यच्चान्यदसतस्तदसत्* (कणादः, वै.सू. ९।१।५) अर्थात् पूर्वोक्ताभावत्रयाद् भिन्नोऽभाव एवात्यन्ताभावः । वस्तुतस्तु प्रागभावस्योत्तरावधिकत्वम्, प्रध्वंसस्य च पूर्वावधिकत्वम्, अन्योन्याभावस्य पुनः प्रतियोगिसमानाधिकरणत्वम् अत्यन्ताभावस्य तु तत्त्रितयवैधर्म्यमतो भिन्नोऽयं चतुर्थोऽभाव इति स्पष्टीकरोति मिश्रशङ्करः सूत्रैतद्व्याख्यानावसरे–

*अतः पूर्वोक्तादभावत्रयाद् यदन्यदसत् तदसत् तदत्यन्तासत्त्वम् ... तथा चोक्ताभावत्रयभिन्नो योऽभावः सोऽत्यन्ताभाव इति पर्यवसन्नोऽर्थः । तत्र प्रागभावस्य उत्तरावधिकत्वम्, प्रध्वंसस्य पूर्वावधिकत्वम्, अन्योन्याभावस्य प्रतियोगिसमानाधिकरणत्वमत्यन्ताभावस्य तु त्रितयवैधर्म्यमतश्चतुर्थोऽयमभावः* (मिश्रः, वै.२०६४- ९।१।५) ।

वस्तुतस्तु नित्यसंसर्गाभावत्वमत्यन्ताभावत्वम् । अथवा त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकत्वमत्यन्ताभावत्वं वा । यथा वायौ रूपं नास्तीति । ननु अत्यन्ताभावः कथं नित्यः ? यत्र भूतलादौ घटोऽपसारितः पुनरानीतश्च तत्र पूर्वं सतो घटात्यन्ताभावस्य घटानयनेन नाशात् । तत्र तदानीमपि अत्यन्ताभावस्य सत्त्वे घटानयनानन्तरमपि प्रमात्मकघटात्यन्ताभावबुद्धेः प्रसङ्गाद् इति चेन्न, तत्र घटाभाववद्भूतलमिति ज्ञानकालीनभूतलस्वरूपसम्बन्धाभावेन घटात्यन्ताभाववद्भूतलमिति प्रतीतेरयोगात् । घटकालस्य तत्सम्बन्धाघटकत्वात् । केचित्तु घटापसारणेन उत्पद्यमानो घटानयनेन नश्यन् उत्पादविनाशशाली सामयिकाभावो नाम चतुर्थोऽयं संसर्गाभावः । अत्र प्राचीना घटादिध्वंसप्रागभावाधिकरणे कपालादौ घटो नास्तीति प्रतीतिसम्भवेऽपि तत्र नात्यन्ताभावमङ्गीकुर्वन्ति । श्यामघटे रक्तो नास्ति रक्तघटे श्यामो नास्तीति धीश्च प्रागभावं ध्वंसाभावञ्चावगाहते न तु तदत्यन्तभावं तयोर्विरोधात् । नवीनास्तु तत्र विरोधे मानाभावाद् ध्वंसादिकालावच्छेदेनाप्यत्यन्ताभावो वर्तत इति वदन्ति ।

***न्यायशास्त्रेऽभावपदार्थः***

न्यायवैशेषिकयोस्समानतन्त्रत्वाद् वैशेषिके चाभावस्य व्याख्यातत्वात्तदेव न्यायदर्शनसम्मतमभावपदार्थजातमिति वक्तुं सुशकम् । अथापि न्यायदृष्ट्याऽभावस्य स्थितिः केत्यत्र न्यायसूत्रानुसारेण किञ्चन विजृम्भ्यते ।

न्यायशास्त्रन्तावत् प्रमाणशास्त्रम् । शास्त्रेऽस्मिन् विशिष्य ज्ञानप्रक्रिया वर्ण्यते । अतो न प्रमेयविश्लेषणावकाशोऽत्र । तथापि प्रमाणस्य कृत्यसंसूचनार्थं किञ्चन प्रमेयमुद्दिष्टं विविक्तञ्च दर्शनेऽस्मिन् । अभावस्तु न्यायदर्शनस्योद्देशकसूत्रे नोद्दिष्टो न वान्तः प्रसङ्गाच्च विविक्तः, तथा सत्यपि पृथक्प्रमाणत्वाभावेऽपि अभावः पदार्थः प्रमाणत्वेन तु गृहीत एव । तदेतत् *न चतुष्ट्वमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात् ॥ शब्द ऐतिह्यानर्थान्तरभावादनुमानेऽर्थापत्तिसम्भवाभावानामनर्थान्तरभावाच्चाप्रतिषेधः ॥ नाभावप्रामाण्यं प्रमेयासिद्धिः ॥ लक्षितेष्वलक्षणलक्षितत्वादलक्षितानां तत्प्रमेयसिद्धिः* (गौतमः, न्यायसूत्रम् २।२।१,२,७,८) इत्येतैराक्षपादवचोभिः पुष्यति । तावता चाभावस्यास्वीकारे कथं प्रमाणत्वेन गृहीतः स्यात् ? तथा गृहीतत्वान्न्यायदर्शनेऽप्यभावपदार्थः स्वीकृत इत्यभिधातुं न काचित् संशीतिर्न वा भीतिः । किञ्च *असत्यर्थे नाभाव इति चेन्न, अन्यलक्षणोपपत्तेः ॥ प्रागुत्पत्तेरभावोपपत्तेश्च* (गौतमः, न्यायसूत्रम् २।२।९,१२), *सुषुप्तस्य स्वप्नादर्शने क्लेशाभावादपवर्गः ॥ प्रागुत्पत्तेरभावानित्यत्ववत्स्वाभाविकेऽप्यनित्यत्वम्* (गौतमः, न्यायसूत्रम् ४।१।६३,६६), *एकस्मिन् भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेरप्रश्नः* (गौतमः, न्यायसूत्रम् ४।२।१०) *अन्तर्बहिश्च कार्यद्रव्यस्य कारणान्तरवचनादकार्ये तदभावः* (गौतमः, न्यायसूत्रम् ४।२।२०), *प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः* (गौतमः, न्यायसूत्रम् ५।१।१२) इत्यादिषु सूत्रेषु नामग्राहपूर्वकमभावस्योक्तत्वादथ च पूर्वपक्षत्वेनागतेषु *सर्वमभावो भावेष्वितरेतराभावसिद्धेः* (गौतमः, न्यायसूत्रम् ४।२।३७), *कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभावः ॥ तेषु चावृत्तेरवयव्यभावः* (गौतमः, न्यायसूत्रम् ४।२।७,८) इत्यादिषु सूत्रेषु चाभावोक्तत्वादभावः स्वीकृत इति सिद्ध्यति । तत्र तावत्तद्भेदविशेषमभिलक्ष्य विवरणाभावेऽपि उपर्युक्तसूत्रमध्ये *असत्यर्थे नाभाव इति चेन्न, अन्यलक्षणोपपत्तेः ॥ प्रागुत्पत्तेरभावोपपत्तेश्च* (गौतमः, न्यायसूत्रम् २।२।९,१२), *प्रागुत्पत्तेरभावानित्यत्ववत्स्वाभाविकेऽप्यनित्यत्वम्* (गौतमः, न्यायसूत्रम् ४।१।६६) इत्येतेभ्यः सूत्रेभ्यः प्रागभावो द्योत्यते । अथ च *सुषुप्तस्य स्वप्नादर्शने क्लेशाभावादपवर्गः* (गौतमः, न्यायसूत्रम् ४।१।६३) इत्यनेन सूत्रेण प्रध्वंसाभावो ज्ञाप्यते । एवमेव *अन्तर्बहिश्च कार्यद्रव्यस्य कारणान्तरवचनादकार्ये तदभावः* (गौतमः, न्यायसूत्रम् ४।२।२०) इत्यमुना च सूत्रेण चात्यन्ताभावः स्फुटं सङ्केत्यते । अन्योन्याभावश्च पुनः *एकस्मिन् भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेरप्रश्नः* (गौतमः, न्यायसूत्रम् ४।२।१०) इति सूत्रं ज्ञापयति । एवमेवान्यदप्यूह्यम् । एतावता न्यायसूत्रेऽपि सभेदोऽभावपदार्थः स्वीकृतो वर्तत इति स्पष्टीभवति । न्यायभाष्यवार्त्तिकादिषु च यथावसरं विवृतोऽपि विद्यत इति । न्यायवैशेषिकयोः समानतन्त्रत्वादेकेनाभिमतमभावजातमितरेणोरीक्रियत इति तु नाविदितं विदुषाम् ।

## निष्कृष्टिः

न्यायदर्शनेऽभावपदार्थः साक्षादुद्दिष्टो नास्ति, न च तत्राभावमधिकृत्य व्याख्याने प्रवृत्तो मुनिरक्षपादः । अथापि सूत्रेष्वनेकशोऽभावपदमागतं विद्यते । तत्र तत्र प्रागभावप्रध्वंसाभावात्यन्ताभावान्योन्याभावाः सन्दृब्धाः । तेन च न्यायचिन्तनेऽभावपादार्थः सभेदः

स्वीकृतः इत्यत्र नास्ति कश्चित् संशीतिगन्धः । वैशेषिकेऽप्युद्देशसूत्रे त्वभावोऽनुद्दिष्ट एव । तथापि तत्र यथाप्रसङ्गं व्याख्यातत्वात् काणादचिन्तनेऽभावः स्वीकृत इति स्फुटं ज्ञायते । वैशेषिकसूत्राणां नवमाध्यायेऽभावस्य व्याख्यातत्वान्नात्र शङ्कनीयं यद् उद्देशकसूत्रेऽभावस्यानुद्दिष्टत्वादभावो न कणादसम्मतोऽपितु पश्चात्कालिकैः कणभुक्पथानुयायिभिर्योजित इति । यतो हि कणादेनासम्मतत्वे कथं व्याख्यातं स्यादभावजातम् ? इति च गलायत्तमापद्यते । एतावता काणादशास्त्रे मुनिना कणव्रतेन साक्षादेवाभावपदार्थस्यात्मसात्कृतत्वात् समानतन्त्रत्वेन गौतमीयशास्त्रेऽपि तस्य स्वीकारो निराबाधः । किञ्चापवर्गव्याख्यानक्रमेऽक्षपादेन तस्य सुखदुःखाभावरूपत्वस्वीकाराद् तेनाभावः स्वीकृत इत्यत्र नास्ति कश्चन संशयलेशः । तौतातिकैरप्यभावस्य पृथक्पदार्थत्वेनोरीकृतत्वे व्याख्यातत्वेऽपि प्राभाकरास्त्वधिकरणस्वरूपत्वं मन्वते । प्रभाकरतन्त्रेऽभावस्य पृथक्पदार्थत्वेन नावकाशः । न भावोऽभाव इति विग्रहबलाद् भावभिन्नत्वमभावत्वमिति ज्ञायते । अभावश्चासौ प्रथमतः संसर्गाभावान्योन्याभावभेदेन द्विधा विभज्यते । संसर्गाभावः पुनः प्रागभावप्रध्वंसाभावात्यन्ताभावभेदेन त्रिधेत्याहत्य चतुर्विधोऽभावः शास्त्रसिद्धः । अभावस्य चतुर्विधत्वेऽपि नियमेन नञः प्रयोगस्त्वत्यन्ताभावेऽन्योन्याभाव एव नान्यत्रेति ध्येयम् । भविष्यतीति प्रतीतिसिद्धः प्रागभावः, प्रध्वंसाभावस्तु नष्ट इति प्रतीतिसिद्धः । अन्योन्याभावो हि पारस्परिको व्यावृत्तिरूपः । नास्तीति प्रतीतिसिद्धोऽत्यन्ताभावः । लोके वस्तुतस्तु विशिष्यास्यैवाभावव्यवहार इति तु निष्कर्षः ।

## सन्दर्भग्रन्थसूची


उदयनाचार्यः — १९८०, *किरणावली*, गौरीनाथ, (सम्पा.), सम्पूर्णानन्द संस्कृत विश्वविद्यालय ।

उद्योतकरः — १९९७, *न्यायवार्त्तिकम्*, अनन्तलालठक्कुरेण संस्कृतम्, भारतीयदार्शनिकानुसन्धानपरिषद् ।

कणादः — २००४, *वैशेषिकसूत्रम्*, षड्दर्शनसूत्रसङ्ग्रहे सङ्गृहीतम्, सम्पा.जे.एल.गुप्तः, चौखम्बा संस्कृत प्रतिष्ठान ।

गुप्तः, जे.एल. (सम्पा.) — २००४, *षड्दर्शनसूत्रसङ्ग्रहः*, चौखम्बा संस्कृत प्रतिष्ठान ।

गौतमः — २००४, *न्यायसूत्रम्*, षड्दर्शनसूत्रसङ्ग्रहे सङ्गृहीतम्, सम्पा. जे.एल.गुप्तः, चौखम्बा संस्कृत प्रतिष्ठान ।

घिमिरेः, वैकुण्ठः — २०१०, *वात्स्यायनप्रशस्तपादभाष्ययोः तुलनात्मकमध्ययनम्*, अप्रकाशितो विद्यावारिधिशोधप्रबन्धः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः ।

झा, आनन्द — १९६५, *पदार्थशास्त्र*, हिन्दी समिति सूचना विभाग ।

झा, उमारमणः — १९७७, *दशपदार्थी*, श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठम् ।

दीपकघोषः — १९८४, *अभावविमर्शः* सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः ।

पाणिनिः २०१९, *अष्टाध्यायी,* पदच्छेदवृत्तिवार्त्तिकटिप्पणीसहिता, परिष्कर्ता श्रीगोपालशास्त्री, चौखम्बा सुरभारती प्रकाशन ।

... २०००, *धातुपाठः*, सम्पा. नरेश झा, चौखम्बा सुरभारती प्रकाशन।

फणिभूषण १९६८, *न्यायपरिचय*, अनुवादक- डा.किशोरनाथ झा, चौखम्बा विद्याभवन ।

भट्टः, जयन्तः १९८२, *न्यायमञ्जरी*, प्रथमो भागः, ग्रन्थिभङ्गव्याख्यया संवलिता, सम्पूर्णानन्द संस्कृत विश्वविद्यालय ।

भट्टः, नागेशः १९९२, *परमलघुमञ्जूषा*, संशोधकः- पर्वतीयनित्यानन्दपन्तः, नवीन संस्करण, चौखम्बा संस्कृत प्रतिष्ठान ।

भट्टाचार्यः, गदाधरः १९८३, *व्युत्पत्तिवादः*, दीपिकासमलङ्कृतः, टीकाकारः- शिवदत्तमिश्रः, द्वितीय संस्करण, चौखम्बा सुरभारती प्रकाशन ।

भट्टाचार्यः, जगदीशः वै.२०६७, *तर्कामृतम्*, नेपालीभाषानुवादशैषटिप्पणीसहितम्, अनुवादक तथा टिप्पणीकार– जगत्प्रसाद उपाध्याय, विष्णुप्रभा उपाध्याय ।

भट्टाचार्यः, विश्वनाथपञ्चाननः वै.२०५२, *न्यायसिद्धान्तमुक्तावली*, श्रीकृष्णवल्लभाचार्यकृत-किरणावलीव्याख्योपेता, पञ्चम संस्करण, चौखम्भा संस्कृत संस्थान ।

भासर्वज्ञः, २००४, *न्यायसारः* न्यायभूषणयुतः, सम्पा.स्वामी योगीन्द्रानन्दः, पुनर्मुद्रित संस्करण, चौखम्बा विद्याभवन ।

मिश्रः, नारायणः १९६८, *वैशेषिकदर्शन : एक अध्ययन*, चौखम्बा विद्याभवन ।

मिश्रः, शङ्करः, वै.२०६४, *वैशेषिकसूत्रोपस्कारः*, ढुण्ढिराजशास्त्रिकृतया 'प्रकाशिका'हिन्दीव्याख्ययोपेतः, चौखम्बा संस्कृत सीरिज आफिस ।

राधाकृष्णन्, सर्वपल्ली २०१७, *इन्डियन फिलसफी* (भोल्युम- २), षोडशं संस्करणम्, अक्सफोर्ड युनिभर्सिटी प्रेस, दिल्ली ।

व्योमशिवाचार्यः, १९८३, *व्योमवती*, प्रथमो भागः, सम्पूर्णानन्द संस्कृत विश्वविद्यालय ।

... १९८४, *व्योमवती*, द्वितीयो भागः, सम्पूर्णानन्द संस्कृत विश्वविद्यालय ।